# ॥ रामावताररहस्यम् ॥

## श्री-महादेव उवाच

सर्वज्ञो नित्यलक्ष्मीको विज्ञानात्माऽपि राघवः ॥ १६ ॥

सीतामनुशुशोचार्त्तः प्राकृतः प्राकृतामिव।
बुध्यादिसाक्षिणस्तस्य मायाकार्यातिवर्तिनः ॥ १८ ॥

रागादिरहितस्यास्य तत्कार्यं कथमुद्भवेत्।
ब्रह्मणोक्तमृतं कर्तुं राज्ञो दशरथस्य हि ॥ १९ ॥

तपसः फलदानाय जातो मानुषवेषधृक्।
मायया मोहिताः सर्वे जना अज्ञानसंयुताः ॥ २० ॥

कथमेषां भवेन्मोक्ष इति विष्णुर्विचिन्तयन्।
कथां प्रथयितुं लोके सर्वलोकमलापहाम् ॥ २१ ॥

रामायणाभिधां रामो भूत्वा मानुषचेष्टकः।
क्रोधं मोहं च कामं च व्यवहारार्थसिद्धये ॥ २२ ॥

तत् तत्कालोचितं गृह्णन् मोहयत्यवशाः प्रजाः।
अनुरक्त इवाशेषगुणेषु गुणवर्जितः ॥ २३ ॥

विज्ञानमूर्तिर्विज्ञानशक्तिः साक्ष्यगुणान्वितः।
अतः कामादिभिर्नित्यमविलिप्तो यथा नभः ॥ २४ ॥

विन्दन्ति मुनयः केचिज्जानन्ति जनकादयः।
तद्भक्ता निर्मलात्मानः सम्यग्जानन्ति नित्यदा।
भक्तचित्तानुसारेण जायते भगवानजः ॥ २५ ॥

॥ इति श्रीमदध्यात्मरामयणे उमामहेश्वरसंवादे कीष्किन्धाकाण्डे पञ्चमे सर्गे रामावताररहस्यं सम्पूर्णम् ॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Ramavatara_Rahasyam.

generated on **April 5, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits